International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(2): 30-31
© 2025 IJMH
www.themultijournal.com
Received: 24-04-2025
Accepted: 26-04-2025
Publish : 28-04-2025

**Dr. Parshotam Dass**
Assistant Prof. in Sanskrit,
MAM College,
Jammu

**Correspondence:**
**Dr. Parshotam Dass**
Assistant Prof. in Sanskrit,
MAM College,
Jammu

# संस्कृतभाषाधिगमे अधिगमस्य प्रभावः

**Dr. Parshotam Dass**

**सारांश:**

सक्रियाधिगमे भाषासम्बद्धक्रियाः छात्रेभ्यः दीयन्ते। ते तदा स्वयमन्विष्यन्त प्रयास कुवन्तः भाषाम्धिगच्छन्ति। इत्यं छात्रः स्ववयसः अनुगुणं पदक्रीडा, पदान्त्यक्षरीक्रीडाः, शब्दान्वेषणस्पर्धा, वादविवांद स्पर्धा इत्यादिभिः क्रियाभिः क्रियाभिः संवलितेन मनोविज्ञानेनः दाढयेन अङ्गीकुर्वन्ति। प्रकृतं बहुभाषाभूषिते भारतदेशे नैकाः भाषाः प्रत्येक जनः जानीयात्। अतः अनेकभाषाणां शिक्षणे सौलभ्यं च सम्पादयितुं सक्रियाधिगमः शरणकरणीयः। यतोह्यत्र भाषाधिगमसम्बन्धिनः क्रियाकलापान् आचरन्तः भाषामनायासं सलील शिक्षेरन।

भाषा शब्द "भाष-व्यक्तायां वाचि।" इति धातोः "गुरोश्चहलः" इति सूत्रेण अ प्रत्येय सति "अजाद्यतष्टाप्" इत्यनेन सूत्रेण टापि भाषेतिपदं सिद्धयति, अतः व्यक्तवाक् रूपा भाषैव भावाभिव्यक्तै समर्था बोभवीति इति उररीकुर्वाणः "भाष्यते व्यक्तरुपेण किन्चिद् चन्मनोगतमाभिव्यज्यते।" भाषे तीत्थं व्याचक्रुः।

**संस्कृतभाषा**

सम् उपसर्गपूर्वकात् "डुकृञ् करणे" धातोः "निष्ठा", इति सूत्रेण क्त प्रत्यये कृते संस्कृतमिति पदं निष्पद्यते यस्यार्थो विद्यते परिष्कृतम् अदृष्टं परिशुद्धम्। महापुरुषैः मननशीलैः विपश्चिद्धिः व्यवहृताभाषा संस्कृतभाषा इत्युच्यते। संस्कृतं सर्वासामपि भारतीयसंस्कृतीनां सर्वेषां सर्वेषां संस्कारणाञ्च सुभधुरसन्निधिः। भाषासु मुख्या मधुरा रम्या गीर्वाणा भारती इति गदित्वा विद्वद्धिः इयमेव भाषा विज्ञानत्वेन ज्ञानत्वेन चाध्ययनाय आद्रीयते।

**भाषाधिगमः**

भाषाधिगमे त्रय घटकाः सन्ति। वक्ता, भाषा, श्रोता च। वक्ता तस्यां भाषायां निपुणः भवति। अथवा-भाषायाः स्वरुपं प्रयोगं च सम्यक् जानाति। वक्ता अर्थ मनसि निधाय तमर्थ बोधयितुं तत् तेषां गुणस्वरूपं विशेषवशात् तेषां चतुर्धाविभागः क्रियते यथा- एकमुखं शिक्षणम् द्विमुखी क्रियाद्वारा शिक्षणम्, स्वाध्ययनम्। इत्थं चतुर्षुमन्यतम्ः समूहः, क्रियाद्वारा शिक्षणं नाम सक्रियाधिगम। मनोविज्ञानिनः तावत् सक्रियाधिगम स्मंतदपदह इल कवपदह इति किञ्चित् मनोवैज्ञानिक तत्त्व यत् शिक्षणविधिषु आधारत्वेन तिष्ठति इति सक्रियाधिगम। निरुपयन्ति। परं शिक्षाशास्त्र दृष्ट्यां ईक्षामहे तदा सक्रियाधिगमद्वारा पाठनसन्दर्भे बहवः विधयः प्रयुज्यन्ते। यथा प्रत्यक्षविधिः, परियोजनाविधि, क्रीडाविधः, खण्डान्वयविधिः, दण्डान्वयविधिः, निरीक्षणविधि, हयुरिष्टिक्विधि इत्यादयः। अपि च बालोद्यान प्रणाली माण्टेसरि प्रणाली, रचना, प्रणाली, इत्येतत् सर्व सक्रियाधिगमस्य अङ्गम् अभिव्यज्यते।

**सक्रियाधिगमस्य प्रकाराः**

क्रियाः अनन्तरुपाः छात्रस्तरानुगुणं क्रियाः भिद्यन्ते। बालोद्यानस्तरे, प्रथामिकशालारतरे च श्रवणं निरीक्षणं, समायोजनं, संग्रहणं, भाषणं, गानम्, अभिनय, प्रयोगकरणं इत्यादि क्रियाः तेषामधिगमार्थ प्रयुक्तांः भवेयुः प्रौढशालस्तरे च क्रियाणाम् औत्कषर्य, वैविध्यं च वर्ध्रेते। तस्मिन् स्तरे चित्रणं, वर्णलेपन, शिल्पकला, हस्तकला, लेखनं, काव्यरचनं, अभिनयनं, यात्रा, पठनं, चित्रनिर्माणम् इत्यादयः क्रियाकलापः अधिगमार्थमुपयुज्यन्ते।

एवं बहुविधाः क्रियाः सन्ति। तथापि तत्तत्क्रिया जन्याधिगममभिलक्ष्य तेषां विभागः क्रियते। तदाधारीकृत्यः सक्रियाधिगमः त्रेधा विभज्यते। तद्यथा-

1) अवबोधात्मकः सक्रियाधिगमः

2) अनुभवात्मकः सक्रियाधिगमः

3) अभिव्यकत्यात्मकः सक्रियाधिगमः

**1) अवबोधात्मकः सक्रियाधिगमः**

अत्र छात्राणमवबोधनसम्पादनार्थ याश्च क्रियाः उचिताः तैः काच्य-न्तेफ तद्यथा छात्राणां समूहद्वयं कृत्वा दशसु निमेषेषु यावच्छकयं तावत् शब्दान् संगृहय तेषां लिङ्गविभक्ति वचननिर्धारणं कर्तव्यमिति तान् वदेत्। तदा ते सक्रियाः भूत्वा स्वसन्देहस्थाः सम्मील्य स्वपुस्तकानि इतरग्रन्थाश्चा वलोक्य शब्दान् संगृहय तेषां लिङ्गविभक्तिवचनानि निर्धाय वदन्ति।

**2) अभिव्यक्त्यात्मकः सक्रियाधिगमः**

अत्र छात्राणां ज्ञातांशस्य प्रस्तुतीकरणे एव बल दीयते। ये च र्काकलापाः छात्राणामभिव्यक्तिसामथर्यमभिवर्धयन्ति ते एव कार्यकलापाः छात्रेभ्यः दीयन्ते। छात्र सन्दोहद्वयं कृत्वा कमपि विषयवलम्ब्य वादविवाद स्पर्धाम् आयोजयितुं शक्यते। प्रबन्धलेखनं, भाषणमित्यादय क्रियाः अत्र आदियन्ते। भाषणलेखनादिभिः तेषामभिव्यक्तिसामर्थ्यमभिवर्धते। तेन च क्रियाकल्पेन तेषां कौशलस्तरस्य अभिवर्धते। कुत्र कस्य कथम् अभिव्यक्ति क्रियते इति एतेः कार्येः छात्राः अधिगच्छन्ति।

**3) भाषाधिगमे सक्रियाधिगमस्य**

भाषायाः अधिगमः विषयानामधिगमात् सुतरां भिद्यते। भाषा प्रतिदिनमस्माकं व्यवहारे अनुप्रयुज्यतै। अतः पदे पदे भाषा अस्मान् आतृणोति प्रत्येक कार्यस्य, क्रियाकलपस्य वा भाषया सहसम्बन्ध सर्वथा सिद्ध। भाषायाः अपि सम्बन्धः प्रत्येकमपि कार्ये क्रियाकलापे सर्वथा सिद्धः एवं। भाषा बिना क्रियायाः स्पष्टता नारित। क्रियया बिना भाषा न तिष्ठति। अतः उभयोः परस्परमन्योन्याश्रयः।

एवं स्थिते भाषायाः अधिगमे सक्रियाधिगमपद्धति को वा अन्यतमविधिः श्रेष्ठः नान्यः कथ४िचत् प्रत्यहं दृष्टं वस्तुनिर्देष्टुं प्रचलन्तं कार्यविशेषु वर्णवितु समदि एव भाषागतपदानि वयमन्विप्याम। सत्यामेव आवश्यकतायां वयं कामपि नूतनां भाषा शीघ्र खलु अधिगच्छाम। सक्रियाधिगमे तावत् तादृशी परिस्थितः निर्मीयते या च नूतनभाषा शीघ्रमेवावगन्तुं प्रेरयति।

सक्रियाधिगमे भाषासम्बद्धक्रियाः छात्रेभ्यः दीयन्ते। ते तदा स्वयमन्विष्यन्त प्रयास कुवन्तः भाषाम्धिगच्छन्ति। इत्यं छात्रः स्ववयसः अनुगुणं पदक्रीडा, पदान्त्यक्षरीक्रीडाः, शब्दान्वेषणस्पर्धा, वादविवांद स्पर्धा इत्यादिभिः क्रियाभिः क्रियाभिः संवलितेन मनोविज्ञानेनः दाढयेन अङ्गीकुर्वन्ति। प्रकृतं बहुभाषाभूषिते भारतदेशे नैकाः भाषाः प्रत्येक जनः जानीयात्। अतः अनेकभाषाणां शिक्षणे सौलभ्यं च सम्पादयितुं सक्रियाधिगमः शरणकरणीयः। यतोहयत्र भाषाधिगमसम्बन्धिनः क्रियाकलापान् आचरन्तः भाषामनायासं सलील शिक्षेरन।

एवमसौ सक्रियाधिगमपद्धतिः संस्कृतभाषा शिक्षणेऽपि समर्था वा न वा इति परिशीलनम् औचित्यं भजते प्रस्तुतकाले। अस्मिन् काले संस्कृतं सामान्यजनानां दैनन्दिनव्यवहार पथे नास्ति। अतः नेयं व्यावहारिकी भाषा इति कथ्यते। अतः अस्याश्च अव्यावहारिकीति कथ्यमानायाः भाषायाः अधिगमः व्यावहारिकरुपया सक्रियाधिगम पद्धत्या सुकरो वा इति विचारे कश्चन दृढः सिद्धान्तः अपेक्ष्यते।

अतः संस्कृतभाषायाः अधिगमे सक्रियाधिगमस्य प्रभावः अस्ति इति दृश्यते।

**सन्दर्भग्रन्थसूची**

1) डॉ॰ सन्तोषमित्तल - संस्कृतशिक्षणम्, जयपुर, 2006।

2) डॉ॰ कर्नल चक्रवत्ति - संस्कृताध्यापनम्, तिरुपति, 1996।

3) नरेन्द्र - शिक्षा संस्कृतम्, पण्डिचेरी, 1997।

4) फतेह सिंह - संस्कृतशिक्षणम्, 1996।

5) पाणिनि - अष्टाध्यायी।

6) सफाया रघुनाथ - संस्कृत शिक्षणम्, 1997।

7) मुरलीधर शर्मा - संस्कृत शिक्षण समस्या।